# श्री सुरसरस्वती सभा (रि) शृङ्गेरि

## तुरीया परीक्षा

## प्रथमपत्रिका

दिनाङ्कः - २.१.२००७ अङ्काः - १००

पूर्वाह्ने - १०.०० तः १.०० पर्यन्तम् समयः - घण्टात्रयम्

**1.** पञ्चानां एकवाक्येन उत्तरं लिखत । **5**

१. पार्वत्याः जन्मदिनं केषां सुखाय बभूव?

२. उपपत्तिमत् वचनं कः कं ऊचे?

३. पुरुषाधमः कुत्र रतः भवति?

४. यक्षः कुत्र वसतिं चक्रे?

५. मातङ्गः कस्मिन् कुले जातः?

६. तालध्वजः कः?

७. नारीणां सौख्यत्रयं किम्?

८. भासकविना कति नाटकानि विरचितानि?

**2.** पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत । **10**

१. यक्षः कदा कथं भूतं मेघं ददर्श?

२. कः रिपुः उन्मूलयितुं सुकरः?

३. कनकं कैः परीक्ष्यते? पुरुषः कैः परीक्ष्यते?

४. पवनपदवीमारूढं काः प्रेक्षिष्यन्ते?

५. मातङ्गः प्रेतपुर्यां किं अपश्यत्?

६. कुतः अर्जुनः पर्याकुलो बभूव? कथं नवो बभूव?

७. धर्मराजस्य दृष्ट्या बान्धवाः के?

८. मधुमक्षिकाणां व्यवहारं वर्णयत।

**3.** द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत । **8**

१. विद्या किं किं साधयति?



पश्चादनुवर्तते

२. वामदेवः राजानं किं अवदत्?

३. स्ववधोपायं पृच्छन्तं धर्मपुत्रं भीष्मः किमुवाच?

४. राजा बकाय किं प्रतिश्रुतवान्?

**4.** वाक्यत्रयं सप्रसङ्गं विवृणुत । **9**

१. अविवेकः परमापदां पदम्।

२. याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

३. सचिव ! नैष अमुष्या मृत्युसमयः।

४. मृषोद्यताऽद्य भवन्तं मा स्पृशतु।

५. अपरमिदं प्रियमनुष्ठितं मे भवत्या।

**5.** द्वयोः भावं विशदयत । **8**

१. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥

२. अथावमानेन पितुः प्रयुक्ता
दक्षस्य कन्या भवपूर्वपत्नी ।
सती सती योगविसृष्टदेहा
तां जन्मने शैलवधूं प्रपेदे ॥

३. धूमज्योतिस्सलिलिमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकरु तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

**6.** श्लोकद्वयं पूर्णं लिखत । **4**

१. विपदि धैर्यं ............................ महात्मनाम् ॥

२. प्रथमवयसि ........................... विस्मरन्ति ॥



पश्चादनुवर्तते

7. एकस्य कवेः देशकालादिकं अधिकृत्य लिखत । 4

१. कालिदासः २. लक्ष्मणसूरिः

8. एकस्य लघुटिप्पणिं लिखत । 4

१. हिडिम्बा २. केशवदासः

9. चत्वारि पदानि वाक्ये योजयत । 4

१. कर्तव्यं २. तस्मै ३. सम्प्रति

४. लब्ध्वा ५. प्रतिश्रुतं ६. उच्चैः

10. चतुर्णां रूपाणि विवेचयत । 4

१. नभसः २. अद्रौ ३. मे

४. धनिनः ५. मघोनः ६. संग्रहैः

11. चतुर्णां पर्यायपदानि लिखत । 4

१. विप्रः २. मेघः ३. सम्प्रति

४. दामोदरः ५. स्यन्दनम् ६. नदी

12. चतुर्णां विग्रहवाक्यं विलिख्य समासनाम् लिखत । 6

१. सूत्रग्रथितः २. निशिताङ्कुशेन ३. नगाधिराजः

४. पूर्वापरौ ५. पञ्चाङ्ग निर्णयः ६. वृकोदरः

13. चतुर्णां सन्धिं विभज्य नाम लिखत । 4

१. अणुरपि २. नागेन्द्रः ३. त्वय्युपेक्षेत

४. किञ्चिदस्ति ५. चावश्यम् ६. तवैव

14. द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

१. त्रायताम् २. स्थास्यति

३. ददर्श ४. सेवते

15. द्वयोः व्याकरणविशेष लिखत । 4

१. नागाधिराजः २. मर्षयतु भवान् ३. मा भूः

16. समासमेकं सलक्षणं विशदयत । 4

१. कर्मधारयः २. द्विगुः

17. चतुर्थं पदं लिखत । 4

कृष्णः : धवलः :: पीवरः : वृषः .....................

गुडाकेशः : अर्जुनः :: हृषीकेशः : .....................

द्वादश : द्वन्द्वः :: चक्रपाणिः : .....................

तिष्ठ : लोट् :: दद्याम् : .....................

18. इतरवचनानि लिखत । 4

१. ........................ ................ मधूनि

२. ............ अकुरुतं ................

३. वर्तै .................... ................

४. वाचि ................ ................

19. रिक्तस्थानं पूरयत । 4

१. प्रणमत ............ आद्यम् ।

२. करणं ............ ते वन्द्याः ।

३. ............ सति चेतांसि न विक्रियन्ते ते धीराः ।

४. बकशिरसि ........... विधाय तं जिघृक्षसि ।

# श्री सुरसरस्वती सभा (रि) शृङ्गेरि

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः - २.१.२००७ अङ्काः - ५०

पूर्वाह्णे - १.३० तः ३.०० पर्यन्तम् समयः - सार्धैकहोरा

1. विषयमेकं अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत । 5

सत्सङ्गतिः, महाभारतम्, ग्रन्थालयः

2. निर्धारणे काः विभक्तयः प्रयोक्तव्याः इति सोदाहरणं विवृणुत । अथवा 5

द्वितीया विभक्तिः कदा उपयुज्यते? सोदाहरणं विशदयत।

3. द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

१. अभविष्यत् २. अगमत् ३. कर्ता ४. चक्रे

4. व्याजस्तुतिं उदाहरणसहितं विवृणुत । 3

5. अथ तं सवनाय दीक्षितः अत्र वृत्तलक्षणं सप्रस्तारं विशदयत । 3

6. प्रयोगपरिवर्तनं कुरुत। 4

१. आकाशे चन्द्रेण सदा प्रकाश्यते

२. भवान् किं पश्यति ?

३. बालैः क्रीड्यते अङ्गणे।

४. एताः सुन्दर्यः अगायन्।

7. वाक्यदोषं परिहरत। 3

हरिः वैकुण्ठे अधिशेते।

पादयोः खञ्जः भवति।

गणेशः मोदकं रोचते।

8. अन्यलिङ्गरूपं लिखत । (त्रयाणामेव) 3

१. भ्राता २. राज्ञी ३. जननी ४. सेवकः



पश्चादनुवर्तते

9. वाक्यमेकं स्वभाषया विवृणुत। 3

१. आशा दुःखस्य कारणम् २. सुपुत्रः कुलदीपकः

10. मातृभाषया अनुवादं कुरुत । 5

१. अस्ति पूर्णायाः सरितस्तटे कालटी ग्रामः।

२. सर्वाः प्रतिज्ञाः सुखनिर्वाहाः न भवन्ति।

३. वयं कस्मादपि न त्रस्यामः।

४. पश्यत्सु कपियूथेषु पुप्लुवे स महार्णवम्।

५. यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासम्।

11. संस्कृतेन अनुवदत । 5

1. ನೀನು ಬಂದಿದ್ದರೆ ಪುಸ್ತಕವನ್ನು ನೋಡುತ್ತಿದ್ದನು.

If you would have come I would have seen the book.

2. ನೀವು ದೀರ್ಘಕಾಲ ಬಾಳಿರಿ.

You live long.

3. ಯಾವನು ಈ ಕೆಲಸವನ್ನು ಮಾಡಿದ?

Who did this work?

4. ಅವನು ಕಳ್ಳನು. ಆದ್ದರಿಂದ ಪೋಲೀಸರಿಂದ ಹಿಡಿಯಲ್ಪಟ್ಟನು.

He is a thief. So he was caught by the police.

5. ನೀನು ಓದಿದರೆ ಉಪಾಧ್ಯಾಯರು ಕಟುವಚನಗಳನ್ನು ಆಡುವುದಿಲ್ಲ.

If you read, the teacher will not utter rude words.